Shodh Prabha: A Multidisciplinary Journal
ISSN: 3108-2726 (Online), Volume-2, Issue-4, (July - August) 2026

# विशिष्टाद्वैतवेदान्ते सृष्टितत्त्वविमर्शः

**पुष्पेण-पाखिरा**
अनुसन्धाता, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

**शोधसंक्षिप्तसारः**

"विशिष्टाद्वैतवेदान्ते सृष्टितत्त्वविमर्शः" इत्यस्मिन् शोधपत्रे विशिष्टाद्वैतवेदान्तानुसारं सृष्टितत्त्वं सम्यगनुशीलितम्। वेदान्तदर्शनेषु सृष्टिसन्दर्भः अत्यन्तमहत्वपूर्णः दार्शनिकविषयः वर्तते। विशेषतः श्रीरामानुजाचार्यप्रतिपादिते विशिष्टाद्वैतवेदान्ते सृष्टिः न मायिकविवर्तः, न च ब्रह्मणः स्वरूपपरिणामः, अपितु परमात्मनः शरीरभूताया अचित्प्रकृतेः परिणामरूपा, परमेश्वरसङ्कल्पाधीना च इति प्रतिपाद्यते। विशिष्टाद्वैतवेदान्तस्य प्रवर्तकः श्रीरामानुजाचार्यः जगतः, जीवस्य, ईश्वरस्य च परस्परसम्बन्धं विशिष्टरूपेण निरूपयति। परब्रह्म श्रीमन्नारायणः चिदचिद्विशिष्टस्वरूपः, जगतः अभिन्ननिमित्तोपादानकारणमिति विशिष्टाद्वैतस्य मूलप्रतिपाद्यम्। तथा च चित्-अचित्तत्त्वयोः ब्रह्मणः शरीर-शरीरिभावसम्बन्धः प्रतिपादितः। सृष्टिः ब्रह्मणः वास्तविकपरिणामरूपा, न तु मायिकाभासमात्रम् इति अत्र विशेषतया प्रतिपाद्यते। विशिष्टाद्वैतवेदान्ते सृष्टेः स्वरूपं, कारणतत्त्वं, जगतः सत्यत्वं, तत्त्वत्रयसम्बन्धं प्रतिपादितम्। प्रस्तुतशोधे श्रीभाष्यम्, भगवद्गीता, उपनिषद्भाष्याणि तथा अन्यप्रामाणिकग्रन्थाः प्रमुखस्रोतरूपेण स्वीकृताः भवन्ति। प्रलयकाले चित्-अचित्तत्त्वे ब्रह्मणि सूक्ष्मरूपेण अवस्थिते भवतः। ईश्वरस्य संकल्पेन प्रकृतेः विकासः भवति, ततः महत्, अहङ्कारः, तन्मात्राणि, पञ्चमहाभूतानि च प्रादुर्भवन्ति। एतेभ्यः समस्तं चराचरजगदुत्पद्यते। जीवाः स्वकर्मानुसारं विविधशरीराणि प्राप्नुवन्ति, ईश्वरश्च अन्तर्यामीरूपेण सर्वेषां नियन्ता भवति। एवं जगत् सत्यं, ब्रह्मणः शरीरं, सृष्टेश्च प्रयोजनं जीवानां कर्मफलप्रदानं मोक्षप्राप्त्युपकारश्च इति।

**मुख्यशब्दाः** सृष्टितत्त्वम्, ईश्वरः, चित्, अचित्, परब्रह्म, अभिन्ननिमित्तोपादानकारणम्।

**उपोद्घातः**

भारतीयशास्त्रपरम्परायां सृष्टिरहस्यमतिविचित्रम्। यद्यपि तस्य रहस्योद्घाटनाय विमर्शाय वा एकं जन्म पर्याप्तं न भवति, तथापि सामाजिकव्यवहारनिर्वहणेन सह दुःखानां तत्कारणानाञ्चावगतिः सृष्टेः व्यवहारिकप्रयोजनं निखिलदुःखानां मूलोत्पाटनं सर्वोच्चसुखस्य प्राप्तये सृष्टेरलौकिकं प्रयोजनमिति मन्यामहे। प्राणिनः सर्वे स्व-स्व-कर्मानुसारं शरीरेन्द्रियादीनि लभन्ते, कर्मफलाञ्चानुभवन्ति अनादिरनन्तेयं सृष्टिः कदारभ्य प्रचलतीति न कोऽपि वक्तुं शक्नोति। "सर्वं खल्विदं ब्रह्म", "यतो वा इमानि भूतानि जायन्ते", इत्यादिभिः सर्वतन्त्रस्वतन्त्रश्रुतिप्रमाणैः "जन्माद्यस्य यतः", "शास्त्रयोनित्वात्" इति वादरायणसूत्रयोः च आधारेण जगतः उत्पत्तिकारणं, स्थितिकारणं, प्रलयकारणञ्च ब्रह्मेति निश्चितम्। तथापि भिन्नाभिप्रायवन्तो शास्त्रकाराः जगत्कारणविषये भूतानां सृष्टिविषये च मौलिकमतानि पोषयन्तीति।

भारतीयतत्त्वचिन्तनपरम्परायां वेदान्तदर्शनस्य परमार्थतत्त्वनिर्णायकत्वम् अप्रतिहतप्रामाण्यमधिगतम्। श्रुतिप्रस्थानस्य निगूढार्थनिरूपणपरायणेषु वेदान्तसम्प्रदायेषु भगवद्रामानुजाचार्यैः प्रतिष्ठितः विशिष्टाद्वैतवेदान्तः। आचार्यः श्रुत्यर्थसमन्वयपरिशुद्ध्या, तर्कवैदग्ध्येन, तत्त्वत्रयप्रतिपादनवैशिष्ट्येन च स्वकीयमद्वितीयं दार्शनिकवैभवं प्रकाशयति। दर्शनेऽस्मिन् परब्रह्मणः सर्वाधारत्वं, सर्वनियन्तृत्वं, सर्वशेषित्वं, चित्-अचितोः तदधीनशरीरभावश्च विशिष्टैक्यप्रतिपादकशरीरशरीरिभावसम्बन्धेन निरूप्यते। अत एव विशिष्टाद्वैतस्य अद्वैतता न

निर्विशेषब्रह्मैक्यवादपर्यवसिता, अपितु सगुणपरब्रह्मणः तात्त्विकैक्यप्रतिपादने पर्यवस्यति।

सृष्टितत्त्वं भारतीयदर्शनपरम्परायाः परमगम्भीरविमर्शविषयेषु अन्यतमम्। विशिष्टाद्वैतवेदान्ते सृष्टिः न परब्रह्मणः स्वरूपपरिणामविशेषः, नापि मायिकविवर्तकल्पना, अपितु चिदचिद्विशिष्टस्य परब्रह्मणः स्वशरीरभूतचिदचिद्वस्तुनोऽव्यक्तावस्थातः व्यक्तावस्थाप्रतिपादनरूपा वास्तविक-प्रपञ्चाभिव्यक्तिरिति सिद्धान्तः उपस्थाप्यते। अद्यतनदार्शनिकपरिप्रेक्ष्येऽपि सृष्टितत्त्वविमर्शः अस्तित्वमीमांसा, कारणमीमांसा, ईश्वरवादः, मोक्षसाधनचर्चा चेति बहुषु विमर्शक्षेत्रेषु विशेषोपयोगित्वमावहति। अतः "विशिष्टाद्वैतवेदान्ते सृष्टितत्त्वविमर्शः" इति शोधपत्रस्यायं प्रयासः विशिष्टाद्वैतवेदान्तप्रतिपादितस्य सृष्टिसिद्धान्तस्य श्रुतिस्मृत्यादिप्रमाणसमन्वितं, कारणकार्यभाव-विश्लेषणपरकं, दार्शनिकदृष्ट्या च अध्ययनं विधातुमभिप्रेतः। एवं चायं शोधप्रयत्नः विशिष्टाद्वैतवेदान्तस्य सृष्टितत्त्वमीमांसायाः शास्त्रीयगाम्भीर्यं, तात्त्विकसुसम्बद्धतां, दार्शनिकप्रामाणिकतां च प्रकाशयितुं प्रवर्तते।

**विशिष्टाद्वैतवादस्य परिचयः**

विशिष्टाद्वैतवेदान्तः भारतीयदर्शनपरम्परायां वेदान्तदर्शनस्यान्यतमः प्रमुखः सम्प्रदाय-विशेषोऽस्ति। विशिष्टस्य अद्वैतं विशिष्टाद्वैतम्। अद्वैतमिति पदस्यार्थः एकत्वम् इति। 'विशिष्टम्' इति पदस्य सकलैः चेतनपदार्थैः तथा च सकलैः अचेतनपदार्थैः विशिष्टं नाम सहितम् इत्यर्थो भवति। तथा च विशिष्टाद्वैतं नाम सकलचेतनाचेतनपदार्थसहितस्य एकत्वम् इति।

आचार्यरामानुजप्रतिपादितः सिद्धान्तः विशिष्टाद्वैतवेदान्तः इति प्रसिद्धः - तन्मते चित् (जीवः) अचित् (जगत्) ईश्वरः (ब्रह्म) चैतत्त्रयमपि सत्यमस्ति। चिदचिद्भ्यां विशिष्टं (युक्तं सहितं वा) ब्रह्मैव जगतः सृष्टिस्थितिप्रलयादिकर्मसु प्रवर्तते। द्वाभ्यां विशिष्टत्वादेवात्र विशिष्टाद्वैतमिति स्वीक्रियते।

शङ्कराचार्यपरंपरापूर्ववर्तिभिः पश्चाद्वर्तिभिश्चाचार्यैर्वेदान्तस्याद्वैततत्त्वप्रतिपादकत्वं सिसाधयिषुभि-स्तद्दिशैव वेदान्ता व्याख्याताः। तैर्ब्रह्मसत्यं जगन्मिथ्याप्रभृतिभिः वाक्यैः तत्त्वमस्यादिवाक्यैश्च निर्विशेषाद्वैतसाधनाय महान् प्रयत्नोऽनुष्ठितः। रामानुजाचार्यप्रभृतिभिर्वैष्णवाचार्यैः शङ्कराचार्यप्रतिपादितः अद्वैतसिद्धान्तः भृशं समालोचितः खण्डितश्च। श्रीरामानुजाचार्यैः प्रस्थानत्रयीभाष्ये, श्रीभाष्ये, वेदार्थपारिजातप्रभृतिग्रन्थेषु च अद्वैतमतं विखण्ड्य विशिष्टाद्वैतवादः प्रतिष्ठापितः। श्रीरामानुजाचार्यभगवत्पादैः उपनिषदां, भगवद्गीतायाः, ब्रह्मसूत्राणां च समन्वयात्मकव्याख्यानेन विशिष्टाद्वैतसिद्धान्तः सुस्पष्टतया प्रतिपादितः।

**तत्त्वमीमांसा**

श्रीरामानुजाचार्यमते ईश्वरः (ब्रह्म), चित् (जीवः), अचित् (जगत्) च एतत् त्रयमपि सत्यमस्ति। सृष्टितत्त्वावबोधनाय समासेन तत्त्वत्रयस्य विवरणमुपस्थाप्यते –

ईश्वरः - रामानुजाचार्यदर्शने ब्रह्मेश्वरौ समानार्थकौ वर्तते। रामानुजाचार्यस्य मते चित् (जीवः) तथा अचित् (जडप्रकृतिः) उभे अपि ईश्वराश्रिते स्तः। तयोः स्वातन्त्र्येण सत्ता न सम्भवति। अतः ईश्वरः चिदचिद्वस्तुनोः परमाश्रयोऽस्ति। अत्रेश्वरः सगुणः सविशेषश्चिदचिद्विशिष्टश्चास्ति। सर्वस्यापि जगत्प्रपञ्चस्योत्पत्तिलयकारणमीश्वर एवास्ति। ईश्वरोऽयं जगतोऽभिन्नोपादानकारणरूपो वर्तते। जीवोऽचित्पदार्थश्च द्वावपि नित्यौ स्तः। प्रलयकाले ते पदार्थाः सूक्ष्मतमां यान्ति। सृष्टिकाले च पुनः स्थूलरूपं धारयन्तीश्वरप्रेरणया। सूक्ष्मं चिदचिद्विशिष्टं ब्रह्म कारणरूपं स्थूलं चिदचिद्विशिष्टकारणं ब्रह्म च

कार्यरूपमस्ति। यथा अचित्पदार्थस्य मूलकारणमीश्वरः अस्ति, तथैव चित्पदार्थस्यापि मूलमीश्वर एव।[1]

जीवः तथा जगत् वस्तुतः नित्यौ पदार्थौ स्तः, किन्तु तौ ईश्वराधीनौ भवतः। अतः चित्-अचित् ब्रह्मणः शरीररूपेण कथ्येते। ईश्वरः सगुणः सविशेषश्चास्ति। ईश्वरः कल्याणगुणानामाकारः अस्ति। सः आनन्दज्ञानस्वरूपः, आनन्दरूपः तथा ज्ञानशक्त्यादिभिः कल्याणगुणैः विभूषितः। स एव जगतः सृष्टि-स्थिति-प्रलयकार्यस्य कर्तास्ति। सर्वोपरि रामानुजाचार्यः आत्मरूपेण विष्णुमेव स्वीकृतवान्। सः विष्णुं श्रेष्ठतमगुणसम्पन्नं परमब्रह्मरूपं मन्यते। ब्रह्मा तथा शिवोऽपि विष्णोः एव स्वरूपौ स्तः। ब्रह्मसूत्रकारः अपि "तद्गुणसारत्वात्तु तद्व्यपदेशः प्रज्ञावत्"[2] इति सूत्रेण प्रतिपादयति यत् ब्रह्म ज्ञानगुणप्रधानत्वात् ज्ञानस्वरूपेण निर्दिश्यते। श्रुतिरपि कथयति –"यः सर्वज्ञः सर्ववित्"।[3]

चित्पदार्थः - श्रीरामानुजाचार्यमते चित्पदार्थः जीवात्मास्ति। चित्स्वरूपोऽयं जीवो नित्यो जन्ममरणादिरहितोऽणुरूपश्चास्ति। सः चेतनः, ज्ञानस्वरूपः, ज्ञाता, कर्ता, भोक्ता चास्ति। शरीरेन्द्रियादिविलक्षणोऽयं जीवः स्वप्रकाशः ज्ञानाश्रयश्चास्ति। स्वभावतो नित्यमुक्तोऽप्ययं जीवः मायावशात् स्वकर्मवशाच्च बन्धनमासाद्य जन्ममरणप्रवाहे भ्रमति। कर्मबन्धनेनाबद्धः अयं सांसारिकजीवः दुःखी भवति अपिच सः जीवः सीमितोऽल्पज्ञश्च भवति। एतादृशस्य जीवस्य सर्वाणि क्लेशावरणानि मुक्तदशायां नश्यन्ति। तदा क्लेशावरणरहितो जीवो भगवत्सान्निध्यमवाप्य परमानन्दमनुभवति। जीवस्येश्वरसान्निध्यप्राप्तिरेव मोक्षो भवति न तु जीवस्येश्वरेणैकरूपता विशिष्टाद्वैतसिद्धान्ते स्वीक्रियते। ईश्वरः जीवस्यास्याश्रयो भवति। रामानुजाचार्यसिद्धान्ते नित्य-मुक्त-बद्धभेदेन जीवानां त्रिविधावस्था वर्णिता। यः भगवदनुग्रहेण, भक्तियोगेन प्रपत्तियोगेन वा संसारबन्धनात् विमुक्तः परमपदं प्राप्तो भवति, स जीवः मुक्तजीवः। अथ च पाञ्चभैतिकशरीरपोषणपरायणा आत्मज्ञानविरहिता जीवा बद्धजीवाः कथ्यन्ते। नित्याः गरूडविष्वक्सेनादयः मुक्ताः। नित्यजीवाः ते सन्ति ये कदापि बन्धनं न प्राप्तवन्तः, न च तेषां मोक्षप्राप्तेः कदाप्यपेक्षा अभवत्। ते आदित एव नित्यमुक्ताः सन्ति। श्रीरामानुजाचार्यसिद्धान्ते भगवच्छरणागत्यैव जीवा मुक्तेरधिकारिणो भवन्ति। शरणागतिरेव चरमोपात्वेन निदर्शितो भक्तिमार्गे। यथोक्तं श्रीमद्भगवद्गीतायाम् –

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।

अहं त्वां सर्वपापेभ्यः मोक्षयिष्यामि मा शुचः"।।[4]

अचित्पदार्थः - रामानुजाचार्यसिद्धान्ते अचिच्छब्देन ज्ञानशून्यं जडवस्त्वेव व्यवह्रियते। अचित् स्वयं किञ्चिदपि न जानाति, न कर्तुं समर्थः, किन्तु ईश्वराधीनः सन् जगतः उपादानरूपेण प्रवर्तते। अचित्तत्त्वमिदं मिश्रसत्त्व-शुद्धसत्त्वकालभेदेन त्रिविधं भवति।[5] या सत्त्व-रजस्-तमस् इति त्रिगुणात्मिका सृष्टिरस्ति सा मिश्रसत्त्वरूपा सृष्टिरिति कथ्यते। भगवान् लीलार्थमेव सृष्टिं कुरुते। अस्याः एव महत्, अहंकारः,तन्मात्राणि, पञ्चमहाभूतानि, इन्द्रियाणि, मनः, शरीराणि च उत्पद्यन्ते। बद्धजीवानां शरीराणि अपि अस्मात् मिश्रसत्त्वात् एव निर्मितानि भवन्ति।

रजस्तमोगुणविहीना सृष्टिः शुद्धसत्वाख्या भवति। भगवद्विग्रहो नित्य-मुक्तपुरुषशरीराणि वैकुण्ठलोकश्च

[1] श्रीमद्भगवद्गीतारामानुजभाष्यम्. १३.२

[2] ब्रह्मसूत्रम्. २.३.२९

[3] मुण्डकोपनिषद्. १.१.९

[4] श्रीमद्भगवद्गीता. १८.६६

[5] भारतीय-तत्त्वमीमांसा. पृ. २२४

शुद्धसत्त्वनिर्मितानि भवन्ति। एषा नित्यशुद्धा, अविकारा, दुःखरहिता च अस्ति। मोक्षावस्थायां प्राकृतिक-देहपातानन्तरं भगवत्संकल्पनिर्मितमप्राकृतं शुद्धशरीरं लभते जीवः। सत्त्वादिशून्यं जडद्रव्यं कालनाम्ना ज्ञायते। कालः अपि अचित्पदार्थः एव। सः नित्यः, सर्वव्यापी च। कालस्य साहाय्येन एव सृष्टिः, स्थितिः, प्रलयः, परिवर्तनं, जन्म, वृद्धिः, विनाशः इत्यादयः क्रिया सम्भवन्ति। कालोऽपि परमेश्वराधीनः अस्ति। रामानुजाचार्यसिद्धान्तानपसारं सृष्टिरियं न मिथ्यापितु वर्तते वास्तविकी।

**कार्यकारणवादः**

शङ्कराचार्यस्य विवर्तवादस्य खण्डनं क्रियते रामानुजाचार्येण – कथमेतत् यत् चित् (जीवः) अचित् (जगत्) च सूक्ष्मरूपेण ब्रह्मणि वर्तते। विश्वरचनाकाले एतत्तत्त्वद्वयं चेतनजीवात्मनां जडजगतश्च रूपे परिणमयति। परिणामस्य च सत्यत्वादेतज्जगदपि सत्यम्। कारणसिद्धान्तस्यैतत्तात्पर्यं यत्कारणं स्वयमेव आत्मानं परिवर्त्य अन्तर्निहितशक्तिः कार्यरूपेण अभिव्यञ्जयति।[6] सत्कार्यवादानुसारं कारणे कार्यस्य सत्तास्ति। जगतः कार्यता ब्रह्मावस्थान्तरस्यैव नाम। अवस्थान्तरापत्तिरेव हि कार्यता।[7]

कारणकार्ययोरनन्यत्वम् – अत्र शङ्का भवति – एकस्यैव अवस्थान्तरयोगेऽपि बुद्धिशब्दान्तरादयो बालत्वयुवत्वादिषु दृश्यन्ते, मृद्दारुहिरण्यादिषु द्रव्यान्तरत्वेऽपि दृश्यन्ते, तत्र मृद्घटादिषु कार्यकारणेषु बुद्धिशब्दान्तरादयोऽवस्थानिबन्धना एवेति कुतो निर्णीयते ?

समाधाने कथयति रामानुजाचार्यः – कुण्डलादिकार्ये सद्भावे कारणभूतहिरण्यस्योपलब्धेः "इदं कुण्डलं हिरण्यम्" इति हिरण्यत्वेन प्रत्यभिज्ञानादित्यर्थः। न चैवं हिरण्यादिषु द्रव्यान्तरेषु मृदादयः उपलभ्यन्ते। अतो बालयुवादिवत् हिरण्यादिषु मृदादय उपलभ्यन्ते। अतो बालयुवादिवत् कारणभूतमेव द्रव्यम् अवस्थान्तरापन्नं कार्यमिति इति गीयते।[8] अपरकार्यस्य सत्वाच्च कारणात् कार्यस्यानन्यत्वम्। लोकवेदयोर्हि कार्यमेव कारणतया व्यपदिश्यते, यथा लोके "सर्वमिदं घटशरावादिकं पूर्वाह्णे मृत्तिकैवासीत्" इति। वेदे च – "सदेव सौम्येदमग्र आसीत्"।[9] यथा तन्तव एव व्यक्तिसंगविशेषभाजः पट इति नामरूपकार्यान्तरादिकं भजन्ते, तद्वद् ब्रह्मापि।[10] यथा च वायुरेक शरीरे वृत्तिविशेषं भजमानः प्राणापानादिनामरूपकार्यान्तराणि भजते, तद्वद् ब्रह्मैकमेव विचित्रस्थिरत्रस्वरूपं जगत् भवतीति परमकारणात्परस्माद् ब्रह्मणोऽनन्यत्वं जगतः सिद्धम्।[11]

**विशिष्टाद्वैतवेदान्ते सृष्टिक्रमः**

रामानुजाचार्यप्रतिपादितः विशिष्टाद्वैतवेदान्तः भारतीयदर्शनपरम्परायां प्रमुखः सिद्धान्तः अस्ति। अस्मिन् दर्शने श्रीमन्नारायणः परब्रह्म, जगतः निमित्तोपादानकारणरूपेण स्वीकृतः। जगत् न मिथ्या, अपि तु ब्रह्मणः वास्तविकं शरीरमस्ति। जीवः (चित्) तथा प्रकृतिः (अचित्) ब्रह्मणः विशेषणभूतौ स्तः। अतः सृष्टिः ब्रह्मणः मायया कल्पिता न,

---

[6] श्रीभाष्यम्, २.१.१५

[7] श्रीमद्भागवद्गीता रामानुजभाष्यम्. १३.२

[8] श्रीभाष्यम्, २.१.१५-१६

[9] श्रीभाष्यम्, २.१.१७

[10] श्रीभाष्यम्, २.१.१९

[11] श्रीभाष्यम्, २.१.२०

किन्तु तदधीनप्रकृतेः वास्तविकः परिणामः इति रामानुजाचार्यस्य अभिप्रायः। रामानुजाचार्यमतानुसारं ब्रह्मैव जगतः अभिन्ननिमित्तोपदानकारणम्। यथा मृदः घटस्य कारणं भवति, तथैव ब्रह्म स्वाधीनया प्रकृत्या जगतः कारणम्। किन्तु ब्रह्मणः स्वरूपे विकारो न भवति, विकारः प्रकृतेरेव भवति।

रामानुजाचार्याणां जगत्सृष्टिसम्बन्धी मतम् उपनिषदनुगुणमस्ति। आचार्यः उपनिषत्सु वर्णितां सृष्टिप्रक्रियाम् अक्षरशः स्वीकरोति। तेषां रामानुजाचार्याणां मते सर्वशक्तिसम्पन्नः ईश्वरः स्वेच्छया नानाविधविषयसम्पन्नं जगत् स्वस्मादेव सृजति। चित्-अचित्पदार्थौ ईश्वरे एव स्थितौ स्तः। एतस्य सिद्धान्तस्य समर्थनं श्वेताश्वतरोपनिषदि विद्यते –

"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।

अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः"।।[12]

तथा च –

"मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्।

तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्"।।[13]

रामानुजाचार्यस्य मते प्रकृतिः ईश्वराधीना तेनैव सञ्चालिता च भवति। सः जगत् ब्रह्मवत् सत्यमेव मन्यते, न तु मिथ्या। चिदचित्विशिष्टस्य विश्वस्यास्य उपादानकारणं निमित्तकारणं च ब्रह्मैव अस्ति। परिणामः ईश्वरस्य देहस्य सम्बन्धी भवति, न तु तस्य स्वरूपस्य। ईश्वरस्य स्वरूपभूता आत्मा सर्वदा निर्विकारा, अविकारिणी च तिष्ठति। अतः सृष्टिः ब्रह्मणः वास्तविकः परिणामः अस्ति, किन्तु तेन ब्रह्मणः स्वरूपे कश्चिदपि विकारः न जायते।

रामानुजाचार्यस्य मते यदि जगतः उपादानकारणं ब्रह्म सत्यमस्ति, तर्हि तस्य कार्यरूपं जगदपि सत्यमेव भवति। ईश्वर एव सृष्टेः कर्ता तथा निमित्तकारणमस्ति। एषा सृष्टिः ईश्वरस्य लीलामात्रम् अथवा क्रीडामात्रमिति मन्यते। श्रुतिरपि सर्वशक्तिसम्पन्नम् ईश्वरं जगतः कर्तारं प्रतिपादयति तथा स्वेच्छया सृष्टिं कुर्वन्तम् ईश्वरम् अङ्गीकरोति। एवं रामानुजाचार्यः ब्रह्मणः जगत्कारणत्वं, जगतः सत्यत्वं तथा ईश्वरस्य स्वातन्त्र्यपूर्णं सृष्टिशक्तिं सम्यक् प्रतिपादयति। विशिष्टाद्वैतवादस्य जगत्सृष्टिविषयकं मतं वस्तुवादप्रधानमस्ति। रामानुजाचार्यस्य मते सृष्ट्यवस्थायां ब्रह्म जीवेषु भौतिकपदार्थेषु च व्यक्तरूपेण विद्यमानं भवति। प्रलयावस्थायां तु नामरूपात्मकविषयाणाम् अभावः भवति। तदा ब्रह्म शुद्धचित्स्वरूपेण अव्यक्ताचिद्विशिष्टं तिष्ठति, एषैव तस्य कारणावस्था उच्यते। ब्रह्मणः कारणावस्थैव प्रलयावस्था भवति, यस्यां नामरूपयोः अभावः विद्यते। सृष्ट्यावस्था तु कार्यावस्था भवति, यस्यां नामरूपयोः स्पष्टाविर्भावः तथा निश्चिततत्वं भवति। अतः यद्यपि रामानुजाचार्यः जगतः सत्यत्वम् अङ्गीकरोति, तथापि तस्य कार्यरूपत्वात् तस्य विनाशः अथवा प्रलये लयः सम्भवति।

रामानुजाचार्यस्य मते प्रलयावस्थायां प्रकृतिः सूक्ष्माविभक्तरूपेण तिष्ठति। तस्यामेव अवस्थायाम् ईश्वरः जीवात्मनां पूर्वकर्मानुसारं पुनः संसारस्य सृष्टिं करोति। ईश्वरस्य इच्छया या सूक्ष्मा प्रकृतिः अग्नि-जल-वायुरूपेषु तत्त्वेषु विभज्यते। एषा एव सृष्टेः प्रारम्भावस्था भवति। ततः कालस्य प्रवाहेण एतेषां त्रायाणां तत्त्वानां परस्परसंयोगः भवति, यस्मात् स्थूलपदार्थानामुत्पत्तिः जायते। एते स्थूलपदार्थाः एव भौतिकजगद्रूपेण प्रत्यक्षतया दृश्यन्ते।

[12] श्वेताश्वतरोपनिषद्. ४.५

[13] श्वेताश्वतरोपनिषद्. ४.१०

विशिष्टाद्वैतवेदान्ते सृष्टिविषयः उपनिषद्-भगवद्गीता-ब्रह्मसूत्र-पुराणेषु प्रतिपादिततत्त्वानां श्रीरामानुजाचार्यभगवत्पादैः समन्वितरूपेण निरूपितः। सिद्धान्तस्यास्य मूलतत्त्वं यत् परब्रह्म श्रीमन्नारायणः जगतः अभिन्ननिमित्तोपादानकारणमिति। जगत् न मिथ्या, न च केवलं विवर्तः अपितु परमात्मनः शरीरभूतत्वेन सत्यमेव। सृष्टिः तस्य लीलाविभूतिरूपा, जीवानां कर्मफलोपभोगसाधनभूता च।

**प्रलयावस्था (कारणावस्था) –** प्रलयसमये नामरूपविभागः सर्वथा तिरोहितो भवति। तदा समस्तं चिदचिद्वस्तु कारणदशायां परब्रह्मणि अवस्थितं भवति। अयं भावः शरीर-शरीरिभावसम्बन्धेन अवगन्तव्यः। अतः श्रीभाष्ये श्रीरामानुजाचार्यः प्रतिपादयति - सूक्ष्मचिदचिद्विशिष्टं ब्रह्म कारणं, स्थूलचिदचिद्विशिष्टं ब्रह्म कार्यम्।[14] अस्य तात्पर्यं – प्रलयकाले जीवजगतञ्च स्वस्वविशेषव्यापाररहितसूक्ष्मावस्थायां ब्रह्मणि अवस्थितं भवति। न तेषां सत्ता नश्यति, केवलं व्यक्तनामरूपविभागस्य लयो भवति। श्रुतिरपि वदति – "सदेव सौम्येदमग्र आसीदेकमेवाद्वितायम्"।[15] विशिष्टाद्वैतव्याख्याने "सत्" इति शब्दः चिदचिद्विशिष्टपरब्रह्मणि वर्तते, न तु निर्विशेषब्रह्मणि।

ईश्वरसंकल्पः – जीवानां पूर्वकृतकर्मफलप्रदानार्थं भगवान् सृष्टिं कर्तुमिच्छति। संकल्पोऽयं न कस्यचित् बाह्यप्रेरणया, किन्तु स्वातन्त्रस्वरूपेण भवति। तत्र श्रुतौ उक्तं – "तदैक्षत बहुस्यां प्रजायेयेति"।[16] तथा च – "स ईक्षत लोकान्नु सृजा"[17] इति। अत्र "ईक्षणम्" न केवलं ज्ञानमात्रम् अपितु सर्वज्ञस्य सर्वशक्तिमतः परमेश्वरस्य सृष्ट्यभिमुखः संकल्पविशेषः।

प्रकृतेः प्रवर्तनम् – प्रकृतिः स्वतन्त्रतया कर्त्री नास्ति। सा भगवदधीना, तस्य आज्ञावशवर्तिनी च। भगवद्गीतायां – "मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्"।[18] अर्थात् प्रकृतिः परमेश्वराधिष्ठिता सती जगत्सृष्टौ प्रवर्तते।

प्रकृतेः परिणामः – विशिष्टाद्वैतदर्शने परिणामवादः स्वीकृतः। अत्र ब्रह्मणः स्वरूपे विकारो न भवति, किन्तु तच्छरीरभूता प्रकृतिः परिणाममापद्यते। क्रमः मूलप्रकृतिः – महत् – अहङ्कराः – तन्मात्राणि – पञ्चमहाभूतानि। एतादृशः क्रमः सांख्यदर्शनेन साधारणतया समानः, किन्तु महदन्तरम् एतत् यत् सांख्ये प्रकृतिः स्वतन्त्रा, विशिष्टाद्वैते तु परमेश्वराधीना।

महत्तत्त्वोत्पत्तिः – प्रथमः विकारो महत्तत्त्वम्। एषा समष्टिबुद्धिरूपा विश्वव्यवस्थायाः आद्यावस्था। तस्मात् ज्ञानशक्तेः व्यवस्थितिः, विश्वरचनायाः प्रारम्भश्च भवति।

अहङ्कारोत्पत्तिः – महतः अहङ्कारो जायते। अहङ्कारस्य त्रिविधभेदः – सात्त्विकः, राजसः, तामसः। एभ्यः देवता, इन्द्रियाणि, तन्मात्राणि च क्रमशः विकसितानि भवन्ति।

तन्मात्रोत्पत्तिः – तामसाहङ्कारात् पञ्चसूक्ष्मभूतानि – शब्दतन्मात्रा, स्पर्शतन्मात्रा, रूपतन्मात्रा, रसतन्मात्रा, गन्धतन्मात्रा एतानि स्थूलसृष्टेः कारणानि भवन्ति।

पञ्चमहाभूतोत्पत्तिः – तन्मात्रेभ्यः क्रमशः आकाशः, वायुः, अग्निः, आपः, पृथिवी च स्थूलमहाभूतानि उत्पद्यन्ते। तैः सर्वं स्थूलजगत् निर्मीयते।

[14] श्रीभाष्यम्, ब्रह्मसूत्रम्. २.३.१८

[15] छान्दोग्योपनिषद्. ६.२.१

[16] छान्दोग्योपनिषद्. ६.२.३

[17] ऐतरेयोपनिषद्. १.२.१

[18] श्रीमद्भगवद्गीता.९.१०

Shodh Prabha: A Multidisciplinary Journal
ISSN: 3108-2726 (Online), Volume-2, Issue-4, (July - August) 2026

ब्रह्माण्डनिर्माणम् – महाभूतसंघातेन ब्रह्माण्डमुत्पद्यते। ततः चतुर्दशभुवनानि, ब्रह्मा, रुद्रः, इन्द्रादिदेवताः, मनुष्याः, तिर्यञ्चः, स्थावरजङ्गमसृष्टिः सर्वं क्रमशः प्रादुर्भवति। पुराणेषु वर्णितः नाभिकमलोत्पन्नब्रह्मा अपि परमात्मनः नियोगेन एव सृष्टिव्यापारं करोति।

जीवानां शरीरोत्पत्तिः – जीवः अनादिः, नित्यः, अणुपरिमाणः, ज्ञानस्वरूपः। सृष्टिकाले भगवान् प्रत्येकजीवस्य सञ्चितकर्मानुसारं योग्यं शरीरं ददाति। भगवद्गीतायां –

“सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम्।

कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम्”।।[19]

अन्तर्यामित्वम् – सृष्टिः केवलमुत्पाद्य न परित्यज्यते। भगवान् सर्वेषु भूतेषु अन्तर्यामिरूपेण तिष्ठति। बृहदारण्यकोपनिषदि उक्तं – “यः पृथिव्या तिष्ठन् अन्तरः...यस्य पृथिवी शरीरम्...”[20] इति। इत्थं समस्तविश्वस्य भगवच्छरीरत्वं प्रतिपाद्यते।

**सृष्टेः प्रयोजनम्**

विशिष्टाद्वैतवेदान्तमतानुसारं सृष्टेः प्रयोजनम् ईश्वरस्य जीवेषु अनुग्रहः तथा तेषां कर्मफलभोगाय व्यवस्था इति स्वीक्रियते। जीवानामनादिकालसञ्चितकर्माणां फलभोगार्थं भगवान् जगत् सृजति। शरीर-इन्द्रिय-लोकादीनां व्यवस्था कर्मानुसारमेव भवति। सृष्टौ जीवाः शास्त्रश्रवणं, भगवदुपासनां, भक्तिं, प्रपत्तिं च कृत्वा मोक्षं प्राप्तुं शक्नुवन्ति। अतः सृष्टिः केवलं बन्धनाय न, अपितु मोक्षस्यावसरः अपि अस्ति। रामानुजाचार्याः वदन्ति यत् सृष्टिः भगवतः लीला अपि अस्ति। किन्तु एषा लीला कस्यचित् अभावपूरणार्थं न, अपितु पूर्णकामस्य परमेश्वरस्य स्वाभाविकशक्तेः प्रकाशः। जगत् भगवतः शरीररूपमिति विशिष्टाद्वैतस्य सिद्धान्तः। अतः सृष्टिद्वारा भगवतः ज्ञान-बल-ऐश्वर्य-करुणादिगुणाः प्रकाश्यन्ते।

**उपसंहारः**

विशिष्टाद्वैतवेदान्ते सृष्टितत्त्वविमर्शः इत्यस्मिन् शोधपत्रे रामानुजाचार्यप्रतिपादितस्य विशिष्टाद्वैतवेदान्ते सृष्टितत्त्वस्य सम्यगनुशीलनं कृतम्। अध्यनेन सिद्धं यत् विशिष्टाद्वैतदर्शने परब्रह्म श्रीमन्नारायणः एव चिदचिद्विशिष्टः, जगतः अभिन्ननिमित्तोपादानकारणं चास्ति। जगत् न मायिकं, न च असत्यं, अपितु परमात्मनः शरीरभूतत्वेन सत्यं, तस्याधीनं च वर्तते। प्रलयकाले चिदचिद्वस्तूनि कारणावस्थायां ब्रह्मणि अवस्थितानि भवन्ति, सृष्टिकाले तु तस्यैव सङ्कल्पेन अचित्प्रकृतेः परिणामद्वारा नामरूपविभागः प्रादुर्भवति। अतः सृष्टिः न विवर्तमात्रं, न च ब्रह्मस्वरूपविकारः, किन्तु ईश्वराधीनप्रकृतेः वास्तविकः परिणामः। तथा जीवः नित्यः, ज्ञानस्वरूपः, कर्मवशात् संसारे भ्रमन् ईश्वरानुग्रहेण भक्ति-प्रपत्युपायाभ्यां मोक्षं प्राप्नोति। सृष्टिः जीवानां कर्मफलभोगाय, धर्मपालनाय, भगवदुपासनाय तथा परमपुरुषार्थस्य मोक्षस्य साधनत्वेन प्रवर्तते। शरीर-शरीरिभावः, अन्तर्यामित्वम्, तत्त्वत्रयस्वरूपं, परिणामवादश्च विशिष्टाद्वैतस्य दार्शनिकवैशिष्ट्यं प्रतिपादयन्ति।

तुलनात्मकदृष्ट्या अद्वैतस्य विवर्तवादात् तथा द्वैतस्य भेदप्रधानसिद्धान्तात् विशिष्टाद्वैतस्य सृष्टिवादः समन्वयात्मकः,

---

[19] श्रीमद्भगवद्गीता.९.७

[20] बृहदारण्यकोपनिषद्.३.७.३

श्रुतिस्मृतिसम्मतः, युक्तिसङ्गतश्च इति निष्पन्नम्। अयं सिद्धान्तः केवलं दार्शनिकचिन्तनस्य विषयः न, अपितु भक्तेः नैतिकजीवनस्य ईश्वर-जीव-जगत्सम्बन्धस्य च सुदृढं तात्त्विकाधारं प्रददाति। अतः विशिष्टाद्वैतवेदान्ते प्रतिपादितं सृष्टितत्त्वं भारतीयवेदान्तपरम्परायाम् अत्यन्तमहत्वपूर्णं, सर्वाङ्गसुन्दरं, समन्वयात्मकञ्च दार्शनिकप्रतिपादनमित्यस्य शोधकार्यस्य मुख्यो निष्कर्षः। इति शम्।

**आकरग्रन्थसूची -**

१. जैन डा. महेन्द्रकुमार, “षड्दर्शनसमुच्चय”, भारतीय ज्ञानपीठ, नयी दिल्ली, १९४४.

२. अधिकारी डा. हरिप्रसाद, “भारतीय-तत्त्वमीमांसा”, नवशक्ति प्रकाशन्, वाराणसी.

३. सेनापतिः सुकान्तकुमार, वेदान्तदर्शनसंग्रहः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली, २०२६.

४. झा डा. धनेश्वर, “वैदिकसाहित्ये सृष्टिप्रक्रिया”, राष्ट्रिय संस्कृत साहित्य केन्द्र, जयपुर, २००९.

५. लाल डा. जवाहर, “जगत् विचार”, शिवालिक प्रकाशन, दिल्ली वाराणसी.

६. शतपथी डा. (श्रीमती) सावित्री, “सृष्टिविमर्शः”, लक्ष्मीदाशः, पुरी, २००८.

७. सरस्वती स्वामी सत्यानन्द, “ब्रह्मसूत्रशाङ्करभाष्यम्”, चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली.

८. आचार्य शर्मा श्रीराम, “१०८ उपनिषद्”, युग निर्माण योजना, मथुरा.

९. गोस्वामी ललित कृष्ण, “श्रीभाष्यम्”, चौखाम्बा संस्कृत प्रतिष्ठान, दिल्ली.

१०. द्विवेदी आचार्य श्रीशिवप्रसाद, “श्रीभाष्यम्”, चौखाम्बा विद्याभवन, वाराणसी.

११. शर्मा शम्भुजनुर्गजानन, श्रीमद्भगवद्गीता, परिमल पब्लिकेशन्स, दिल्ली, २०००.